# sudhAdhArAkAlI stotram

# સુધાધારાકાલી સ્તોત્રમ્

## Document Information

Text title : sudhAdhArAkAlIstotram

File name : sudhAdhArAkAlIstotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : NA, PSA Easwaran

Description-comments : mahAkAlasaMhitAyAM shrIguhyakAlyA

Latest update : January 7, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# સુધાધારાકાલી સ્તોત્રમ્

અચિન્ત્યામિતાકારશક્તિસ્વરૂપા
  પ્રતિવ્યક્ત્યધિષ્ઠાનસત્ત્વૈકમૂર્તિઃ ।
ગુણાતીતનિર્દ્વન્દ્વબોધૈકગમ્યા
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧॥

અગોત્રાકૃતિત્વાદનૈકાન્તિકત્વાત્
  અલક્ષ્યાગમત્વાદશેષાકરત્વાત્ ।
પ્રપઞ્ચાલસત્વાદનારમ્ભકત્વાત્
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨॥

અસાધારણત્વાદસમ્બન્ધકત્વાત્
  અભિન્નાશ્રયત્વાદનાકારકત્વાત્ ।
અવિદ્યાત્મકત્વાદનાદ્યન્તકત્વાત્
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૩॥

યદા નૈવ ધાતા ન વિષ્ણુર્ન રુદ્રો
  ન કાલો ન વા પઞ્ચભૂતાનિ નાશા ।
તદા કારણીભૂતસત્વૈકમૂર્તિઃ
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૪॥

ન મીમાંસકા નૈવ કાલાદિતર્કા
  ન સાઙ્ખ્યા ન યોગા ન વેદાન્તવેદાઃ ।
ન દેવા વિદુસ્તે નિરાકારભાવં
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૫॥

ન તે નામગોત્રે ન તે જન્મમૃત્યૂ
  ન તે ધામચેષ્ટે ન તે દુઃખસૌખ્યે ।
ન તે મિત્રશત્રૂ ન તે બન્ધમોક્ષૌ
  ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૬॥

ન બાલા ન ચ ત્વં વયસ્કા ન વૃધ્દ્ધા
   ન ચ સ્ત્રી ન ષણ્ઢઃ પુમાન્નૈવ ચ ત્વમ્ ।
ન ચ ત્વં સુરો નાસુરો નો નરો વા
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૭॥

જલે શીતલત્વં શુચૌ દાહકત્વં
   વિધૌ નિર્મલત્વં રવૌ તાપકત્વમ્ ।
તવૈષામ્બિકે યસ્ય કસ્યાપિ શક્તિઃ
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૮॥

પપૌ ક્ષ્વેડમુગ્રં પુરા યન્મહેશઃ
   પુનઃ સંહરત્યન્તકાલે જગચ્ચ ।
તવૈવ પ્રસાદાન્ન ચ સ્વસ્ય શક્ત્યા
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૯॥

કરાલાકૃતીન્યાનનાનિ શ્રયન્તી
   ભજન્તી કરાસ્ત્રાદિ બાહુલ્યમિત્થમ્ ।
જગત્પાલનાયાઽસુરાણાં વધાય
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૧૦॥

રુચન્તી શિવાભિર્વહન્તી કપાલં
   જયન્તી સુરારીન્ વધન્તી પ્રસન્ના ।
નટન્તી પતન્તી ચલન્તી હસન્તી
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૧૧॥

અપાદાઽપિ વાતાધિકં ધાવસિ ત્વં
   શ્રુતિભ્યાં વિહીનાઽપિ શબ્દં શ◌ૃણોષિ ।
અનાસાઽપિ જિઘ્રસ્યનેત્રાઽપિ પશ્ય-
   સ્યજિહ્વાઽપિ નાનારસાસ્વાદવિજ્ઞા
ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૧૨॥

યથા બિમ્બમેકં રવેરમ્બરસ્થં
   પ્રતિચ્છાયયા યાવદેકોદકેષુ ।
સમુદ્ભાસતેઽનેકરૂપં યથાવત્
   ત્વમેકા પરબ્રહ્મરૂપેણ સિધ્દ્ધા ॥ ૧૩॥

યથા ભ્રામયિત્વા મૃદં ચક્રમધ્યે
કુલાલો વિધત્તે શરાવે ઘટં ચ ।
મહામોહયન્ત્રેષુ ભૂતાન્યશેષાન્
તથા માનુષાંસ્ત્વં સૃજસ્યાદિસર્ગે ॥ ૧૪॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

યથા રઙ્ગરજ્વર્કદૃષ્ટિષ્વકસ્માત્
નૃણાં રૂપદર્વીકરામ્બુભ્રમઃ સ્યાત્ ।
જગત્યત્ર તત્તન્મયે તદ્વદેવ ।
ત્વમેકૈવ તત્ તન્નિદત્તા સમસ્તમ્ ॥ ૧૫॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

મહાજ્યોતિરેકાર સિંહાસનં યત્-
સ્વકીયાન્ સુરાન્ વાહયસ્યુગ્રમૂર્તે
અવષ્ટભ્ય પદ્ભ્યાં શિવં ભૈરવં ચ ।
સ્થિતા તેન મધ્યે ભવત્યૈવ મુખ્યા var મુગ્ધા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૬॥

કુયોગાસને યોગમુદ્રાભ્યનીતિઃ
કુશોભાયુપોતસ્ય બાલાનનં ચ
જગન્માતરાદૃક્ તવાઽપૂર્વલીલા ।
કથં કારમસ્મદ્વિધૈર્દેવિ ગમ્યા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૧૭॥

વિશુદ્ધા પરા ચિન્મયી સ્વપ્રકાશા-
મૃતાનન્દરૂપા જગદ્વ્યાપિકા ચ ।
તવેતદ્વિધા યા નિજાકારમૂર્તિઃ
કિમસ્માભિરન્તર્હૃદિ ધ્યાયિતવ્યા ॥ ૧૮॥ var ભાવિતવ્યા
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

મહાઘોરકાલાનલજ્વલજ્જ્વાલા
હિત્યત્ત્યન્તવાસા મહાટાટ્ટહાસા ।
જટાભારકાલા મહામુણ્ડમાલા
વિશાલા ત્વમીદૃઙ્મયા ધ્યાયશમ્બ ॥ ૧૯॥ var ધ્યાયસેઽમ્બ
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

તપો નૈવ કુર્વન્ વપુઃ સીદયામિ
   વ્રજન્નાપિ તીર્થં પદે ખઞ્જયામિ ।
પઠન્નાપિ વેદાન્ જનિં યાપયામિ
   ત્વદઙ્ઘ્રિદ્વયં મઙ્ગલં સાધયામિ ॥ ૨૦॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

તિરસ્કુર્વતોઽન્યામરોપાસનાર્ચે
   પરિત્યક્તધર્માધ્વરસ્યાસ્ય જન્તોઃ ।
ત્વદારાધનાન્યસ્તચિત્તસ્ય કિં મે
   કરિષ્યન્ત્યમી ધર્મરાજસ્ય દૂતાઃ ॥ ૨૧॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

ન મન્યે હરિં નો વિધાતારમીશં
   ન વહ્નિં ન હ્યર્કં ન ચેન્દ્રાદિદેવાન્ ।
શિવોદીરિતાનેકવાક્યપ્રબન્ધૈઃ
   ત્વદર્ચાવિધાનં વિશત્વમ્બ મત્યામ્ ॥ ૨૨॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

નરા માં વિનિન્દન્તુ નામ ત્યજેન્માં
   ત્યજેદ્બાન્ધવા જ્ઞાતયઃ સન્ત્યજન્તુ ।    var  તથા બાન્ધવા
યમીયા ભટા નારકે પાતયન્તુ
   ત્વમેકા ગતિર્મે ત્વમેકા ગતિર્મે ॥ ૨૩॥

ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥

મહાકાલરુદ્રોદિતસ્તોત્રમેતત્
   સદા ભક્તિભાવેન યોઽધ્યેતિ ભક્તઃ
ન ચાપન્ન ન શોકો ન રોગો ન મૃત્યુ-
   ર્ભવેત્ સિદ્ધિરન્તે ચ કૈવલ્યલાભઃ
ત્વમેકા પરબ્રહ્મરૂપેણ સિદ્ધા ॥ ૨૪॥

ઇદં શિવાયાઃ કથિતં સુધાધારાખ્યં સ્તવમ્ ।
એતસ્ય સતતાભ્યાસાત્ સિદ્ધિઃ કરતલેસ્થિતા ॥

એતત્સ્તોત્રં ચ કવચં પદ્યં ત્રિતયમપ્યદઃ ।

પઠનીયં પ્રયત્નેન નૈમિત્તિકસમર્પણે ॥   var  નૈમિત્તિકસમર્હણે
સૌમ્યેન્દીવરનીલનીરદઘટાપ્રોદ્દામદેહચ્છટા
લાસ્યોન્માદનિનાદમઙ્ગલચયૈઃ શ્રોણ્યન્તદોલજ્જટાઃ ।
સા કાલી કરવાલકાલકલના હન્ત્વશ્રિયં ચણ્ડિકા
કાલી ક્રોધકરાલકાલભયદોન્માદપ્રમોદાલયા
નેત્રોપાન્તકૃતાન્તદૈત્યનિવહાપ્રોદ્દાન દેહામયા ।   var  દેહાભયા
પાયાદ્વો જયકાલિકા પ્રવલિકા હુઙ્કારઘોરાનના
ભક્તાનામભયપ્રદા વિજયદા વિશ્વેશસિદ્ધાસના ॥

ઇતિ શ્રીસુધાધારાકાલી સ્તોત્રં સમાપ્તમ્ ॥

ઇતિ મહાકાલસંહિતાયાં શ્રીગુહ્યકાલ્યાઃ સુધાધારાસ્તવઃ સમ્પૂર્ણઃ ।

કરાલોન્મુખી કાલિકા ભીમકાન્તા
   કટિવ્યાઘ્રચર્માવૃતા દાનવન્તા ।
હૂં હૂં કઝ્મડી નાદિની કાલિકા તુ
   પ્રસન્ના સદા નઃ પ્રસન્નાન્ પુનાતુ ॥

There is a stotra with similar refrain
tvamekA parabrahmarUpeNa siddhA
in Rudrayamala uttaratantra paTala 46 (ShaTchatvArIMshaH paTalaH)
termed as rudrshaktilAkinIstotra or rudrANIstotram with different
content, vailable in ShaTchakra group in Devi chapter.

*sudhAdhArAkAlI stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*